# vRiShAdrinAthastotram

# વૃષાદ્રિનાથસ્તોત્રમ્

## Document Information

Text title : vRiShAdrinAthastotram

File name : vRiShAdrinAthastotram.itx

Category : vishhnu, venkateshwara, stotra, vishnu

Location : doc_vishhnu

Author : tirunandALvaMsharaghunAthAchArya

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : Venkatesha Kavyakalapa

Latest update : April 4, 2015

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# વૃષાદ્રિનાથસ્તોત્રમ્

શ્રીશેષશિખરિસ્વામિન્ રમાભૃદ્વક્ષસસ્તવ
વિલસત્પદ્મસઙ્કાશૌ ચરણૌ શરણં ભજે ॥

ત્વત્કલ્યાણગુણાઙ્કિતામલવચઃપાળી સુધાસ્યન્દિની
નૃત્યન્તી વદને સ્વયં વિલસતે મૂઢસ્ય મે શ્રીવિભો ।
ક્ષોણીમણ્ડલસંસ્થસર્વરસિકા નન્દૌઘસન્દાયિની
દુર્માંસા શનતત્પરે વનમૃગે વ્યાપ્તા ન કિં ચન્દ્રિકા ॥ ૧॥

વેદાસ્સર્વસુરેશ્વરાઃ કમલભૂશ્શમ્ભુશ્ચ મન્વાદયઃ
સ્તોતું યસ્ય મહત્ત્વમક્ષમતમા વ્યાસાદયશ્ચાભવન્ ।
ત્વદ્દાસસ્ત્વદુપાશ્રિતસ્તવ સુતસ્તસ્માદહં નિર્ભયઃ
સ્વામિંસ્તાદૃશવૈભસ્ય ભવતઃ કર્તું યતિષ્યે સ્તુતિમ્ ॥ ૨॥

શ્રીવત્સાઙ્કયતીન્દ્રસંનુતહરે શ્રીવેઙ્કટાખ્યે ગિરૌ
વૈકુણ્ઠાત્સ્વયમાગતઃ પ્રકૃતિસંશ્લિષ્ટાનિમાન્ પ્રાણિનઃ ।
બ્રહ્માણ્ડાન્તરસંસ્થિતાન્ હિ કૃપયા પાતું સદા વર્તસે
તસ્માદ્વિશ્વવિધાયિનસ્તવ કૃપા નિર્હેતુકૈવ ધ્રુવમ્ ॥ ૩॥

પ્રહ્લાદઃ કરિરાડ્ વિભીષણ ઇતિ ખ્યાતાશ્ચ ભક્તા હ્યમી
ભક્ત્યા લબ્ધભવત્કૃપાપરિણતાં તાં લેભિરે સંપદમ્ ।
તસ્માત્કેચિદહો સહેતુકપરાં વ્યાચક્ષિરે ત્વત્કૃપાં
તેષાં ભક્તિમનિન્દિતાં તવ કૃપાલબ્ધાં કથં નોચિરે ॥ ૪॥

સર્વેષાં જગતાં હિ રક્ષણવિધૌ સક્તા કૃપા તાવકી
કાકં ભૂ —– નિલયં સંરક્ષયન્નાદ્ભુતમ્ ? ।
મોહાદ્દુર્વિષયેષુ સક્તમનસાં પાપાત્મનામાદિમં
મિથ્યાદાસ્યયુતં ત્વરક્ષદિતિ માં ચિત્રં હરે શ્રીવિભો ॥ ૫॥

હે સ્વામિન્ ભવરાજયક્ષ્મણિ બહુપ્રારબ્ધનાનામય-

વ્યાલીઢ ઢે ક્ષણદુર્ભરેતર ગુરુતરૈ રન્યૈ રસાધ્યે પરમ્ ।
મગ્નાનાં જડતાજુષાં પ્રતિપદં તાપત્રયીમૂર્ચ્છયા
ક્લિન્નાનાં સકલાત્મનાં વિજયતે સઞ્જીવની ત્વત્કૃપા ॥ ૬॥

દાતૄણાં પ્રવરેણ તેન ભવતા દેયં ધનં શાશ્વતં
સઙ્ખ્યાતીતમનન્તમઙ્ગલપદં પ્રાપ્યં સુખાન્વેષિણામ્ ।
ત્યક્ત્વા લોષ્ટવિકાદિકામ્યમઘદં કાઙ્ક્ષન્તિ યે ત્વૈહિકં
તાન્મૂઢાનપિ હે વિભો તવ કૃપા માતેવ સંરક્ષતે ॥ ૭॥

સર્વેષાં જગતામધીશ્વર ઇતિ ત્વાં ખ્યાપયન્ શ્રીવિભો
સ્ફૂર્જત્પ્રત્નચિરત્નરત્નખચિતઃ કોટીનતુલ્યપ્રભઃ ।
બ્રહ્મેશાનસુરેન્દ્રસર્વદિવિજૈઃ સંસ્તૂયમાનસ્ય તે
સાક્ષાન્મન્મથમન્મથસ્ય મકુટી સંરાજતે મસ્તકે ॥ ૮॥

દેવ ત્વન્મુખપઙ્કજોપરિ મહાસૌરભ્યલોભાગતાઃ
સ્નિગ્ધારાલવિનીલકુન્તલગણા વલ્ગન્તિ ભૃઙ્ગા યથા ।
કર્ણાટોર્ણૌ ચોત્પલકર્ણપૂર વિસરત્કાન્તિ છટારાજિતૌ
પશ્યે સુન્દરશષ્કુલીપરિચિતૌ શ્રીશેષભૂભૃદ્વિભો ॥ ૯॥

કર્પૂરાર્પિતમૂર્ધ્વપુણ્ડ્રમલિકે વિભ્રાજતે સન્તતં
હારિદ્રં તિલકં ચ શેષધરણીભૃદ્વલ્લભ શ્રીવિભો ।
લાવણ્યામૃતપૂરપૂરિતમુખે કિં પુણ્ડરીકદ્વયં
ભાભાતીતિ મહાદ્ભુતં જનયતે દ્વન્દ્વં હિ તે નેત્રયોઃ ॥ ૧૦॥

ભ્રૂભઙ્ગાઙ્કયુતં શુચિસ્મિતરુચિજ્યોત્સ્નાપરિષ્કારિતં
સેવે ત્વન્મુખચન્દ્રમણ્ડલમહં જૃમ્ભત્તમોહારિણમ્ ।
સ્વામિન્ શુક્રબૃહસ્પતી ચિરતરાત્તસ્યોભયોઃ પાર્શ્વયોઃ
ભ્રાજન્તાવિવ રત્નપુઞ્જખચિતે દ્વે કુણ્ડલે ગણ્ડયોઃ ॥ ૧૧॥

દન્તાલિસ્તવ કુન્દકુડ્મલતતેસ્તુલ્યા પરં રાજતે
સૌગન્ધ્યાદહિચામ્પકેયકલિકાપ્રોદ્ભાસિકા નાસિકા ।
સ્વામિન્ વિદ્રુમબિમ્બયુગ્મમધરં વ્યાતન્વતે માધુરી-
સૌરભ્યારુણતાશ્રયસ્ત્વદધરઃ શ્રીશેષભૂભૃદ્વિભો ॥ ૧૨॥

ગ્રૈવેયાદિવિભૂષણાનુકલિતઃ કણ્ઠસ્ત્વદીયો હરે
શેષાદ્રીશ સુવર્ણપટ્ટકલિતં શઙ્ખં વિડમ્બીયતે ।
ચત્વારઃ કિલ જાતપલ્લવસુરક્ષોણીજશાખા ઇવ

દ્યોતન્તે તવ બાહવઃ પ્રવિલસદ્રત્નાઙ્ગદાલઙ્કૃતાઃ ॥ ૧૩॥

શ્રીવૈકુણ્ઠમિદં પદાબ્જયુગમિત્યાદર્શયન્નાત્મનાં
શ્રીહસ્તસ્તવ દક્ષિણશ્શમયતે તાપં ભવોપાર્જિતમ્ ।
હસ્તોઽન્યઃ કટિસઙ્ગતઃ કથયતે કુક્ષિસ્થસઙ્ખ્યાતિગ-
બ્રહ્માણ્ડાતિભરોદ્ધૃતેર્દૃઢબલં મધ્યસ્ય કર્તું દશામ્ ॥ ૧૪॥

અન્યો દક્ષિણપાણિરપ્યમરરાજાત્યન્તબાધાકૃતાં
દૈત્યાનાં વધકારિ ચક્રમનિશં ધત્તેઽઞ્જનાદ્રિપ્રભો ।
અન્યો વામકરસ્તદબ્જનયનાગર્ભૈકનિર્ભેદના-
રાવં શઙ્ખમુદારચન્દ્રસુષમં ધત્તે ત્રિલોકીવિભો ॥ ૧૫॥

યસ્મિન્ કૌસ્તુભબિમ્બિતાં નિજતનું દૃષ્ટ્વા રમાઽન્યેર્ષ્યયા
ત્વાં પશ્યત્યધ ઈક્ષ્યદૃક્પ્રસરણૈર્વક્ષસ્તદુદ્ભાવયે ।
સંવર્તે વિશતે યદન્તરગૃહં બ્રહ્માદિજીવાવલિઃ
તસ્યાં તે વિનિવર્તતે ચ જઠરં તત્કીર્તયે તે હરે ॥ ૧૬॥

બ્રહ્માવાસપયોજનાલનિલયં મે ચિત્તહં સોઽધુના
લાવણ્યામૃતપૂરિતં પ્રવિશતે નાભિહ્રતં તાવકમ્ ।
કીર્યત્કાઞ્ચનવારિજાયતરજસ્તુલ્યામ્બરાલઙ્કૃતં
વલ્ગન્મેખલયા પરિષ્કૃતમહં મધ્યં ભજે સુન્દરમ્ ॥ ૧૭॥

રમ્ભાસ્તમ્ભમદેભહસ્તકરભપ્રાગલ્ભ્યચૌર્યક્ષમૌ
ઊરૂ મે હૃદયાબ્જદર્પણતલસ્તંભાનુભાવં ગતૌ ।
સ્વામિન્નઞ્જનશૈલનાથ સતતં સેવે ભવજ્જઙ્ઘિકે
સ્ફૂર્જન્મન્મથકાહલીકમલગર્ભાકારલીલા જુષૌ ॥ ૧૮॥

સ્વામિન્ વેદસુવર્ણહંસકકૃતપ્રોદ્વેલશોભાઝરી-
ચઞ્ચદ્દિવ્યમુનીશમાનસસરોજાતાબ્જલીલાવહૌ ।
નિત્યં શ્રીકરપલ્લવાનુકલનાસંવાહિતૌ સુન્દરૌ
પાદૌ તેઽઞ્જનશૈલનાયક નિધિપ્રાયૌ સદા સંશ્રયે ॥ ૧૯॥

પ્રાગુત્તુઙ્ગપયોધિવારિધિજલે ત્વં યોગનિદ્રાં ભજન્
નાભિપ્રોત્થિતપઙ્કજસ્થિતવિધિં દૃષ્ટ્વા બહુવ્યાકુલમ્ ।
પુચ્છોદ્ઘટ્ટનકમ્પિતાખિલજગન્મીનાકૃતિં ભેજિવાન્
ઘોરાકારયુતં સુરારિમવધીશ્ચોરં શ્રુતીનાં હરે ॥ ૨૦॥

જૃમ્ભદૈત્યસુપર્વબાહુપટલીસંસક્તસર્પાધિરાડ્-
ભોગાલીઢવિઘૂર્ણિતાવનિધરે મગ્ને જલે વારિધેઃ ।
વાસ્તલ્યાદુદધાર્ષિ ? ભૂધરમમું ત્વં કચ્છપાકારવાન્
બ્રહ્મેશાનબલારિપુ સ્તુતિપરેષ્વમ્ભોરુહાક્ષ પ્રભો ॥ ૨૧॥

સ ત્વં જૃમ્ભિતઘુર્ઘુરારવવિભિન્નાશાવશાવલ્લભ-
શ્રોત્રો યજ્ઞવરાહમૂર્તિરસુરં હત્વા હિરણ્યાક્ષકમ્ ।
અમ્ભોધૌ સરસીવ નાગદશનાગ્રાસક્તપદ્માકૃતિં
દંષ્ટ્રાગ્રેણ રસામધાર્ષિ ભગવઞ્ શ્રીશેષભૂભૃદ્વિભો ॥ ૨૨॥

પ્રહ્લાદાભયદામરેશ્વ ભયદાં તે નારસિંહીં તનું
વન્દે ભૂરિસટાચ્છટાવિદલિત પ્રોત્તુઙ્ગ ધારાધરામ્ ।
ઘૂર્ણત્પાટલનેત્રકોણનિપતજ્જ્વાલાસ્ફુલિઙ્ગાવૃત-
ક્ષોણીચક્રતલાં હિરણ્યકશિપુપ્રધ્વંસિકાં શ્રીવિભો ॥ ૨૩॥

ભિક્ષુત્વાટ્બહુદૈન્યતો બલિસખે ખિન્નસ્તદા સાયનૈઃ વામનઃ
તિષ્ઠન્વેઙ્કટભૂધરે બહુજનાદ્વિત્તં બલાદાપ્સ્યસે । ?
ક્ષત્રાન્ પાપવતો મહાબલયુતાંસ્ત્રિસ્સપ્તકૃત્વોઽવધીઃ
તીક્ષ્ણાગ્રેણ પરશ્વથેન ભગવંસ્ત્વં ભાર્ગવસ્સન્ હરે ॥ ૨૪॥

રામો દાશરથિર્ભવંસ્ત્રિભુવનપ્રખ્યાતતેજોરવિ-
પ્રોદ્વેલાંશુગણૈરિવાતિનિશિતૌસ્સાન્દ્રૈશ્શરૈસ્સાનુજઃ ।
શેષાદ્રીશ વિભો સુરારિમવધીસ્સીતારમાચોરકં
પૌલસ્ત્યં દશકન્ધરં યુધિ જગદ્વિદ્રાવણં રાવણમ્ ॥ ૨૫॥

સ્વામિન્ હન્તુમશક્યમમ્બુજભવાસ્ત્રાદ્યૈશ્શરૈસ્તીક્ષ્ણૈઃ
કક્ષે રાવણમાનિબધ્ય ચતુરો વાર્ધિન્ ય આસેદિવાન્ ।
તાદૃગ્વિક્રમશાલિનં બલવતામગ્રેસરં વાલિનં
ધૈર્યાદિકશરેણ ઘોરમવધીશ્ચિત્રં મહત્વં તવ્ ॥ ૨૬॥

ત્યક્ત્વા ત્વામિહ ધર્મરૂપમનઘં યત્તુચ્છધર્માર્થિને
ત્વત્પિત્રે ન કૃતૈવ મોક્ષસરણિર્જાતાય સૂર્યાન્વયે ।
તત્કાર્યં મમ ધર્મ ઇત્યભિમતં પ્રાપ્તાય ગૃધ્રાય વૈ
તચ્ચિત્રં પરમં પદં ભગવતા દત્તં ત્વયા શ્રીવિભો ॥ ૨૭॥

યસ્તે ભૂર્યપરાધકૃચ્ચલમતિર્દૃપ્તશ્ચ કાકાસુરઃ
પાપાત્મા ભવદસ્ત્રઘર્ષણભિયા ધાવન્વિધીન્દ્રેશ્વરાન્ ।

માં રક્ષધ્વમિતીચ્છયા શરણમાગમ્યાક્ષમૈરક્ષિતું
ત્યક્તસ્તૈઃ પુનરાગતસ્તવ કૃપાપાત્રં બભૂવ પ્રભો ॥ ૨૮॥

અત્રત્યાખિલભક્તરક્ષણમિષાદ્બ્રહ્માદિભિઃ સંસ્તુતઃ
કાન્તારે પિતૃવાક્યપાલનપરઃ સ્વામ્યાગમિષ્યત્યસૌ ।
ઇત્યેવં દૃઢનિશ્ચયાત્તમનસા દત્તં શબર્યા ફલં
ભુક્ત્વા તૃપ્તિમવાપ્યસે રઘુવર શ્રીશેષભૂભૃદ્વિભો ॥ ૨૯॥

ક્રૂરાણાં ભુવિ દાનવામ્શજનુષાં કંસાદિદુષ્ટાત્મનાં
સંહારાય વસુન્ધરાસ્થિતજનાત્યન્તવ્યથાકારિણામ્ ।
શ્રીકૃષ્ણોઽસિ નિજાઙ્ઘ્રિપદ્મયુગસેવાસક્તશિષ્ટાત્મનાં
સંરક્ષાભરકારણાય ચ હરે શ્રીશેષભૂભૃદ્વિભો ॥ ૩૦॥

પૌરાવેદિતનૈજચેષ્ટિતગણાનાકર્ણ્ય માત્રા ભૃશં
કુપ્યન્ત્યા યદુલૂખલે દૃઢતરં રજ્જ્વા નિબદ્ધો ભવાન્ ।
લીલાભિસ્તદુલૂખલં કરતલેનોદ્ધાટ્ય ગત્વાઽર્જુન-
દ્વન્દ્વસ્યામરરૂપતામવિદધચ્છેષક્ષમાભૃદ્વિભો ॥ ૩૧॥

બાલે માતુલસંજ્ઞકેન રિપુણા કંસેન યા પ્રેષિતા
વક્ષોજ (દ્વય) ગુપ્તભૂરિગરલા તત્પૂતના યા પુરા ।
સ્તન્યં ક્ષ્વેલમયં સહાસુભિરહો પીત્વા ચ નિશ્ચેતનાં
કૃત્વા તાં ગિરિસન્નિભામવિહરચ્છ્રીમાન્ ભવાન્ શ્રીવિભો ॥ ૩૨॥

એકં બાલમધો વિધાય વિજને સ્થિત્વા ચ તસ્યોપરિ
ક્ષિપ્રં ગોપગૃહે પિબન્ દધિ મહાયન્ત્રે ઘટાન્તઃસ્થિતમ્ ।
શેષં તસ્ય મુખે વિમૃજ્ય સહસા નિર્ગત્ય તત્રાન્તરે
હ્યાયાતૈર્ગૃહિભિર્નિરીક્ષ્ય સ ભવાન્ તં તાહિતં પ્રાહસત્ ॥ ૩૩॥

બાલ્યેન ત્વયિ મૃત્તિકાં કબલયત્યાક્રોશતઃ સાદરં
માત્રા મૃત્પરિહારણાય વદનં ચોદ્ધાટ્ય તે પાણિના ।
યત્રાલોક્ય કિલાબ્જજાણ્ડપટલીમાશ્ચર્યસંમોહિતા
તસ્યાવઞ્જનશૈલનાયક હરે માયા તવાત્યદ્ભુતા ॥ ૩૪॥

કાલિન્દીસવિધે વિનોદમુરલીનાદેન સંમોહિતાઃ
સુન્દર્યસ્ત્વરયાઽઽગતાઃ સ્મરનિભં ત્વાં વીક્ષ્ય ગોપાઙ્ગનાઃ ।
ત્વદ્બ્રહ્માત્મકતાવિલોકનદશાપન્ના મુનીશા યથા
દિવ્યાનન્દપયોધિમગ્નમનસોઽભૂવન્ વૃષાદ્રિ પ્રભો ॥ ૩૫॥

હે સ્વામિન્ યમુનાતટે તવ પરં વેત્તું મહત્ત્વં પુરા
વત્સાન્ ધેનુગણાંશ્ચ ગોપપૃથુકાન્ ધાત્રા સ્વમાયાહૃતાન્ ।
જ્ઞાત્વા તાદૃશરૂપકાંસ્ત્વમપિ તાન્ કૃત્વા મનોહઙ્કૃતિં
છિત્ત્વા તસ્ય બહૂકૃતિં ચ કમલાસ્વામિન્નકાર્ષીઃ પ્રભો ॥ ૩૬॥

અક્રૂરાય ભવત્પદૈકપ્રનસે પૂર્વં ત્વયા દર્શિતાન્
દીપ્યત્કૌસ્તુભશઙ્ખચક્રમકુટીશ્રીવિદ્યુતા શોભિતાન્
દિવ્યાનન્દમયામિતામૃતરસાસારપ્રદાન્ શ્રીવિભો
સેવેઽહં બહુવિગ્રહાન્ ઘનનિભાંસ્ત્વદ્વિશ્વરૂપાત્મકાન્ ॥ ૩૭॥

બિભ્રલ્લાઙ્ગલમાયુધં સુરરિપૂન્ ભિન્દન્ સપક્ષાન્નૃપાન્
સંરક્ષન્ કરુણાર્દ્રદૃષ્ટિભિરમૂન્ લોકાન્ સમાલોકયન્
ઇન્દ્રાદ્યૈર્દિવિજૈસ્સ્તુતે કટિતટીનીલામ્બરાલઙ્કૃતો
રેવત્યા હૃદયપ્રિયોઽસિ ભગવન્ શ્રીશેષભૂભૃદ્વિભો ॥ ૩૮॥

બુદ્ધોઽસિ ત્રિપુરાઙ્ગનાવ્રતકૃતે ભઙ્ગં વિધાયાસુરાન્
તદ્ભર્તૄન્ શિતિકણ્ઠસાયકહતાન્ કૃત્વા પુરા શ્રીવિભો ।
મ્લેચ્છાન્વાજિખુરોદ્ધતક્ષિતિપરાગાચ્છાદિતાશામ્બરાન્
ક્ષુદ્રાન્ ભૂરિબલાન્ નૃશંસચરિતાન્ કલ્કી હરિષ્યસ્યહો ॥ ૩૯॥

પઙ્કેજાતભવો જગજ્જનનકૃદ્બ્રહ્મા ચતુર્ભિર્મુખૈઃ
ક્ષોણીમણ્ડલભારવાહચતુરશ્શેષસ્સહસ્રાનનૈઃ ।
યત્ખેલાવિહિતાવતારગણનાં કર્તું ન શક્તો હરે
તેઽનન્તાઃ ખલુ દિવ્યમઙ્ગલગુણૈઃ સંશોભિતાસ્તાવકાઃ ॥ ૪૦॥

ત્વત્પાદામ્બુજયુગ્મચિન્તનસુધાપાનૈકલોલાત્મનઃ
પુંસો માનસમન્યદેવ વિષયં કૃત્યં કથં વાઞ્છતિ ।
ત્યક્ત્વા દિવ્યરસાલસાલજનિતં માધુર્યસારં ફલં
કીરઃ કાઙ્ક્ષતિ કિં શલાટુપટલં નૈમ્બં હરે શ્રીવિભો ॥ ૪૧॥

અજ્ઞાનાવૃતમાત્મધર્મરહિતં દૂષ્યં ચ નીચૈર્ગુણૈઃ
નાનાદુર્વિષયાનુષક્તહૃદયં ક્ષુદ્રં કૃતઘ્નં જડમ્ ।
ત્વદ્ભક્તેષુ કૃતાપચારમપિ માં સંરક્ષસે ? બન્ધુવત્
તસ્માત્ત્વાં ન ચ વિસ્મરામિ સતતં શ્રીશેષભૂભૃદ્વિભો ॥ ૪૨॥

સંશોધ્યન્મણિદીપકસ્થિરદૃશા સન્યાંશિતાસ્સન્ત્યજન્ ?

લબ્ધ્વા વજ્રમનર્ઘમાત્તકુતુકસ્સન્ન ત્યજત્યાદરાત્ ।
ત્રય્યા શોધયતા મુમુક્ષુરખિલાન્ સામાન્યદેવાંસ્ત્યજન્
લબ્ધ્વા ત્વાં શરણં પરાત્પરતરં હૃષ્યન્ન મુઞ્ચત્યહો ॥ ૪૩ ॥

ભૂસંસ્થાશ્ચ પરાશરપ્રભૃતયઃ ખે નારદાદ્યર્ષયઃ
પઙ્કેજોદ્ભવલોકસંસ્થમુનયસ્સર્વે સનન્દાદયઃ ।
તત્સાયુજ્યસમુદ્યુજોઽપિ પરમે વ્યોમ્નિ સ્થિતાસ્સૂરયઃ
ત્વમેવાઞ્જનશૈલરાજનિલયં પશ્યન્તિ વૈ સન્તતમ્ ॥ ૪૪ ॥

શેષાદ્રેશ્શિખરે સુવર્ણરચિતે સાલે કટાહાકૃતૌ
ગુપ્તં મૂલધનં યથા તવ પરબ્રહ્મસ્વરૂપં હરે ।
વિજ્ઞાનાઞ્જનમુદ્રિતાન્તરદૃશા દૃષ્ટ્યા ભૃશં યોગિનઃ
પ્રયચ્છન્નુપલભ્ય મોક્ષસરણીદારિદ્ર્યનિર્મોચનમ્ ॥ ૪૫ ॥

ઈશાનં જગતામનન્તગુણિનં દિવ્યોલ્લસદ્વિગ્રહં
લક્ષ્મીશં ધૃતશઙ્ખચક્રમનઘં શેષક્ષમાભૃદ્વિભો ।
સત્યં જ્ઞાનમનન્તમિત્યભિમતશ્રુત્યર્થવૈષમ્યતઃ
વ્યાચક્ષન્ કુદૃશો નિરાકૃતિકલં ત્વાં નિર્ગુણં માયિનઃ ॥ ૪૬ ॥

બ્રહ્માદ્યૈઃ સકલૈસ્સુપર્વપતિભિર્યદ્વૈ દુરાપં પદં
ધ્યાનોન્મીલિતયોગિનામપિ ભૃશં યચ્ચેતસાં દૂરગમ્ ।
યદ્વાચામપિ દૂરવર્તિ પરમં દદ્ધામ લક્ષ્મીવિભો
ત્વત્પાદાબ્જયુગપ્રપત્તિનિરતા ગચ્છન્તિ સૌલભ્યતઃ ॥ ૪૭ ॥

ત્વદ્ભક્તો નિવસન્નિહૈવ દ્રુહિણસ્યાણ્ડાદ્બહિસ્સંસ્થિતે
વૈકુણ્ઠેઽનુભવત્યપારકરુણં ત્વાં દિવ્યદૃષ્ટ્યા હરે ।
વાત્સલ્યાદનુવર્તસે ત્વમપિ તં નિત્યાનપાયાત્મના
વત્સં ધેનુરિવાનુલાલનરતા શ્રીશેષભૂભૃદ્વિભો ॥ ૪૮ ॥

શેષાદ્રીશ કિયન્નિશાકરસુધાસારાસુલુણ્ટાકિની ?
દૃક્ તે સઞ્ચરિણી જિજીવયિષતે જાગત્કજીવવ્રજાન્ ।
કલ્પસ્સ વ્યવહ્રી હ્યભિધી યતે સહિ લયઃ કાલઃ પરીક્ષ્ણ્યતે
હાલાહલ્યશિખાવલીસહચરી યસ્મિન્વિસર્પિષ્યતિ ॥ ૪૯ ॥

સૃષ્ટ્યાં ભૌતિકરૂપકાણ્યપઘનાન્યાસ્વાદ્ય વૈ પ્રાણિનઃ
પુણ્યાપુણ્યપરીણતાનિ પરિતશ્ચારાચરવ્યાપિનઃ ।
સ્વર્ગં નારકમમ્બુજાસનપદં ધાત્રીમધોવિષ્ટપં

યાતાયાતશતૈઃ પ્રયાન્તિ ભવતે માયાવિમોહીકૃતાઃ ॥ ૫૦॥

માયાવૃત્તકલેવરાન્તરગતાસ્સર્વે તનૂભૃદ્ગણાઃ
બ્રહ્માણ્ડાન્તરકોણકૂપકુહરે વિભ્રામિતાઃ કર્મભિઃ ।
તન્નિષ્કામિકમાર્ગબોધરહિતાસ્તિષ્ઠન્તિ મૂઢાત્મકાઃ
બદ્ધદ્વારવિટઙ્કમધ્યવિચરાઃ કીટા ઇવ શ્રીવિભો ॥ ૫૧॥

એતાયસ્તાવદ્ભવમગ્નજન્તુગણિતઃ પાપાત્મનામાદિમઃ
ક્ષુદ્રઃ ક્રૂરમના નૃશંસચરિતસ્ચાપલ્યદોષાકરઃ ।
દૃપ્તસ્સન્તતનીચકૃત્યનિરતો ગત્યન્તરાભાવવાન્
સોઽહં તે ચરણૌ વ્રજામિ શરણં શ્રીશેષભૂભૃદ્વિભો ॥ ૫૨॥

સર્વેષ્વબ્જભવાણ્ડકોટિષુ જનાસ્સઙ્ખ્યાપરાશ્ચેત્સદા
તેષામાયુરનન્તકાલિકમિતિ સ્યાચ્ચેત્પરાર્ધાદિકમ્ ।
સઙ્ખ્યાઽન્યા સમુપાર્જિતા યદિ ભવેદાજન્મજન્માન્તરં
સ્વામિન્ મત્કૃતપાતકાનિ ગણિતું શક્યાનિ લક્ષ્મીવિભો ॥ ૫૩॥

આસ્તાં કલ્પશતાનુભાવ્યદુરિતવ્રાતઃ પરં દુર્વચઃ
ત્વત્કૈઙ્કર્યરુચિઃ કદાચિદપિ વા નાસ્ત્યેવ મે પાપિનઃ
શેષક્ષ્માધરનાથ મામથ યતો રક્ષેતિ વાઙ્નાસ્તિ તત્
સ્વામિન્ કેવલતાવકીયકૃપયા સંરક્ષણીયો હરે ॥ ૫૪॥

પુત્રત્વાન્ન ચ હાતુમિચ્છસિ હરે પાપાત્મકત્વાચ્ચ માં
સ્વામિન્નાનુગ્રહીતુમિચ્છસિ પરં નાચા ? શઙ્ક્ય દૌષ્કામિકમ્ ।
તસ્માન્નારકદુઃખહેતુદુરિતં દૃષ્ટ્વા પરં દુઃખ્યસિ
હાહા હન્ત તવાપિ દુઃખવશતાં દાસ્યામિ લક્ષ્મીવિભો ॥ ૫૫॥

પાપાનીહ મયા કૃતાનિ ગણિતું શક્યાનિ લક્ષ્મીવિભો
સદ્યસ્તાનિ સમુહ્ય વારય કૃપાદૃષ્ટ્યા નિરાતઙ્કયા ।
યદ્વા તાવકભક્તિમેવ પરમાં તન્નિષ્કૃતિં દેહિ મે
નોપેક્ષ્યશ્શરણાગતઃ ખલુ ધરાનાથસ્ય સત્યાત્મનઃ ॥ ૫૬॥

યદ્વા દુર્વચપાપકૃત્યનિરતં મં રક્ષ લક્ષ્મીવિભો
વાત્સલ્યાદિગુણોદધિં મમ ગુરું સંવીક્ષ્ય સત્ત્વાત્મકમ્ ।
કૃત્વા માયિનિરાકૃતિં તવ મતપ્રખ્યાતનિર્વાહકં
બ્રહ્મેન્દ્રાદિકિરીટરત્નસુષમાનીરાજિતાઙ્ઘ્રે હરે ॥ ૫૭॥

ત્વદ્યાથાત્મ્યનિબોધકે મનુવરે નિષ્ટામવાપ્યાદરાત્
ઓઙ્કારાર્થમવેત્ય તત્ત્વસશરણાણસ્તન્નારશબ્દોદિતમ્
અર્થં ચાયનશબ્દવેદ્યમમલં વ્યુત્પત્તિયુગ્મેપ્સિતં
મુક્તસ્સ્યાદ્વિબુધોચિતાર્થમપિ વૈ જ્ઞાની ચતુર્થીરિતમ્ ॥ ૫૮॥

લક્ષ્મીનાથ પરાત્મનશ્ચિદચિતોસ્તત્ત્વસ્ય રૂપં વિદન્
શેષિત્વં ભવતશ્ચરાચરવિભોશ્શેષત્વમપ્યાત્મનઃ ।
વૈષમ્યં પ્રકૃતેર્વિચાય સદુપાયોપેયભાવાત્ સુધીઃ
ત્વત્પાદૌ શરણં ગતસ્તદિતરો સન્મુક્તો ભવેત્સન્ત્યજન્ ॥ ૫૯॥

સુક્તસ્સંપ્રતિપૂજિતસ્સુરવરૈર્બ્રહ્માદિભિસ્સંવ્રજન્
અણ્ડં ચાવરણાન્યતીત્ય ચ મહાવ્યક્તેસ્તક્તે ત રન્વૈ તતઃ
સ્નાતસ્સન્ વિરજાસરિત્યથ ભજન્ દિવ્યોલ્લસદ્વિગ્રહં
વૈકુણ્ઠં ભવતૈવ નન્દતિ સમં શ્રીશેષભૂભૃદ્વિભો ॥ ૬૦॥

સૌવર્ણાઞ્ચિતદિવ્યવજ્રફલકપ્રત્યુપ્તસાલાવૃતે
ભવ્યોત્તુઙ્ગસહસ્રરત્નખચિતસ્તમ્ભોદ્ધૃતે મણ્ડપે ।
દેવીભિસ્સહ સંસ્થિતં ફણિપતેર્ભોગે ફણાલઙ્કૃતે
ધ્યાયે ત્વાં ધૃતશઙ્ખચક્રમનઘં સંવેષ્ટિતં સૂરિભિઃ ॥ ૬૧॥

દિવ્યં તત્પુરધામનામકપુરદ્વારોલ્લસદ્ગોપુરં
ભાસ્વત્કોટિસમપ્રભં હૃદિ સદા ધ્યાયેઽઞ્જનાદ્રિપ્રભો ।
તસ્મિન્ યા વિરજા નદી પ્રવહતે તસ્યોભયોઃ પાર્શ્વયોઃ
સૌવર્ણદ્રુમપુષ્પગુચ્છસુરભીણ્યુદ્યાનવૃન્દાનિ ચ ॥ ૬૨॥

હરે સૂરયસ્તે પરે ધામ્નિ સંસ્થાઃ
નમન્તો વદન્તેતો ભવત્કીર્તનાનિ ।
પ્રગીયયાથ સામ પ્રધીયન્તિ કીર્તિં
વિતન્વન્તિ નિત્યં વિચિત્રં ચ કૃત્યમ્ ॥ ૬૩॥

ક્વચિત્કીરરૂપા હરે સૂરયસ્તે
પ્રવક્ષ્યન્તિ નામાનિ શાખિવ્રજેષુ ।
ક્વચિદ્ભૃઙ્ગરૂપા ભવન્માલ્યગન્ધાન્
સમાઘ્રાય દિવ્યં પ્રમોદં લભન્તે ॥ ૬૪॥

તવ પરમપદે વૈ સૂરયઃ પાર્શ્વયોસ્તે
પરિષદિ રચયન્તે દ્રાવિડામ્નાયગાનમ્ ।

ઇતિ યતિકુલનાથશ્રીશઠારિપ્રમુખ્યાઃ
અપિ ચ ગુરુવરાસ્તે મઙ્ગલાન્યાચરન્તિ ॥ ૬૫॥

શ્રીશેષશૈલશિખરે ચિદચિદ્વિશિષ્ટ
શ્રીસંશ્રિતોરસમપારકૃપૈકપાત્રમ્ ।
આપાદશીર્ષમવલોક્ય હરે જનાસ્ત્વાં
ભક્તાભયપ્રદ સદૈવ મુદં લભન્તે ॥ ૬૬॥

અમ્મઙ્ગિવેઙ્કટાચાર્યચરણામ્બુજસંશ્રિતઃ ।
ચકાર રઘુનાથાર્યઃ શેષભૂભૃદ્વિભોસ્સ્તુતિમ્ ॥

॥ ઇતિ તિરુનન્દાળ્વંશરઘુનાથાચાર્યેણ કૃતં
વૃષાદ્રિનાથસ્તોત્રં સંપૂર્ણમ્ ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com
From a telugu book veNkaTeshakAvyakalApa

*vRiShAdrinAthastotram*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*